# ॥ શ્રીભૈરવીસ્તવરાજઃ ॥

.. Shri Bhairavi StavarAja ..

sanskritdocuments.org

August 20, 2017

# .. Shri Bhairavi StavarAja ..

## ॥ શ્રીભૈરવીસ્તવરાજઃ ॥

## Sanskrit Document Information

Text title : bhairavI Stavaraja

File name : bhairavIstavarAja.itx

Category : stavarAja, devii, dashamahAvidyA

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : October 1, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીભૈરવીસ્તવરાજઃ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ અથ ભૈરવીસ્તવરાજપ્રારમ્ભઃ ॥

બ્રહ્માદયઃ સ્તુતિશતૈરપિ સૂક્ષ્મરૂપં
   જાનન્તિ નૈવ જગદાદિમનાદિમૂર્તિમ્ ।
તસ્માદ્વયં કુચનતાં નવ કુઙ્કુમાભાં
   સ્થૂલાં સ્તુમઃ સકલવાઙ્મયમાતૃભૂતામ્ ॥ ૧॥
સદ્યઃ સમુદ્યતસહસ્રદિવાકરાભાં
   વિદ્યાક્ષસૂત્રવરદાભયાચિહ્નહસ્તામ્ ।
નેત્રોત્પલૈસ્ત્રિભિરલઙ્કૃતવક્ત્રપદ્માં
   ત્વાં તારહારરુચિરાં ત્રિપુરે ભજામઃ ॥ ૨॥
સિન્દૂરપૂરરુચિરં કુચભારનમ્રં
   જન્માન્તરેષુ કૃતપુણ્યફલૈકગમ્યમ્ ।
અન્યોન્યભેદકલહાકુલમાનસાસ્તે
   જાનન્તિ કિં જડધિયસ્તવરૂપમમ્બ ॥ ૩॥
સ્થૂલાં વદન્તિ મુનયઃ શ્રુતયો ગૃણન્તિ
   સૂક્ષ્માં વદન્તિ વચસા મધિવાસમન્યે ।
ત્વાં મૂલમાહુરપરે જગતાં ભવાનિ
   મન્યામહે વયમપારકૃપામ્બુરાશિમ્ ॥ ૪॥
ચન્દ્રાવતંસકલિતાં શરદિન્દુશુભ્રાં
   પઞ્ચાશદક્ષરમયીં હૃદિ ભાવયન્તીમ્ ।
ત્વાં પુસ્તકં જપવટીમમૃતામ્બુકુમ્ભં
   વ્યાખ્યાં ચ હસ્તકમલૈર્દધતીં ત્રિનેત્રામ્ ॥ ૫॥

શમ્ભુસ્ત્વમદ્રિતનયા કલિતાર્દ્ધભાગો
   વિષ્ણુસ્ત્વમમ્બ કમલાપરિરબ્ધદેહઃ ।
પદ્મોદ્ભવસ્ત્વમપિ વાગધિવાસભૂમે-
   સ્તેષાં ક્રિયાશ્ચ જગતિ ત્રિપુરે ત્વમેવ ॥ ૬॥
આશ્રિત્ય વાગ્ભવભવાંશ્ચતુરઃ પરાદીન્

ભાવાન્પદેષુ વિહિતાન્સમુદીરયન્તીમ્ ।
કણ્ઠાદિભિશ્ચ કરણૈઃ પરદેવતાં ત્વાં
સંવિન્મયીં હૃદિ કદાપિ ન વિસ્મરામિ ॥ ૭॥
આકુઞ્ચ્ય વાયુમવજિત્ય ચ વૈરિષટ્ક-
માલોક્ય નિશ્ચલધિયા નિજનાસિકાગ્રમ્ ।
ધ્યાયન્તિ મૂર્ધ્નિ કલિતેન્દુકલાવસન્તં
ત્વદ્રૂપમમ્બ કૃતિનસ્તરુણાર્કમિત્રમ્ ॥ ૮॥
ત્વં પ્રાપ્ય મન્મથરિપોર્વપુરર્દ્ધભાગં
સૃષ્ટિં કરોષિ જગતામિતિ વેદવાદઃ ।
સત્યં તદદ્રિતનયે જગદેકમાત-
ર્નો ચેદશેષજગતઃ સ્થિતિરેવ ન સ્યાત્ ॥ ૯॥
પૂજાં વિધાય કુસુમૈઃ સુરપાદપાનાં
પીઠે તવામ્બ કનકાચલગહ્વરેષુ ।
ગાયન્તિ સિદ્ધવનિતાઃ સહ કિન્નરીભિ-
રાસ્વાદિતાસવરસારુણનેત્રપદ્માઃ ॥ ૧૦॥
વિદ્યુદ્વિલાસવપુષઃ શ્રિયમુદ્વહન્તીં
યાન્તીં સ્વવાસભવનાચ્છિવરાજધાનીમ્ ।
સૌષુમ્નવર્ત્મકમલાનિ વિકાસયન્તીં
દેવીં ભજે હૃદિ પરામૃતસિક્તગાત્રામ્ ॥ ૧૧॥
આનન્દજન્મભવનં ભવનં શ્રુતીનાં
ચૈતન્યમાત્રતનુમમ્બ તવાશ્રયામિ ।
બ્રહ્મેશવિષ્ણુભિરુપાસિતપાદપદ્માં
સૌભાગ્યજન્મવસતિં ત્રિપુરે યથાવત્ ॥ ૧૨॥
શબ્દાર્થભાવિ ભવનં સૃજન્તીન્દુરૂપા યા
તદ્બિભર્તિ પુનરર્કતનુઃ સ્વશક્ત્યા ।
બ્રહ્માત્મિકા હરતિ તત્સકલં યુગાન્તે
તાં શારદા મનસિ જાતુ ન વિસ્મરામિ ॥ ૧૩॥
નારાયણીતિ નરકાર્ણવતારિણીતિ
ગૌરીતિ ખેદશમનીતિ સરસ્વતીતિ ।
જ્ઞાનપ્રદેતિ નયનત્રયભૂષિતેતિ
ત્વામદ્રિરાજતનયે બહુધા વદન્તિ ॥ ૧૪॥

યે સ્તુવન્તિ જગન્માતઃ શ્લોકૈર્દ્વાદશભિઃ ક્રમાત્ ।
ત્વામનુપ્રાપ્ય વાક્સિદ્ધિં પ્રાપ્નુયુસ્તે નરાઃ શ્રિયમ્ ॥ ૧૫॥

॥ ઇતિ શ્રીરુદ્રયામલે ભૈરવીસ્તવરાજઃ સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

.. Shri Bhairavi StavarAja ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*